फेरवः, पुं, ( फे इति रवो यस्य । ) शृगालः । इत्यमरः ।२।५।५ ॥ ( यथा, कथासरित्सागरे । ४७ । ५३ ।
"नृत्यतां तरतां रक्ते नदतां चोत्सवाय सः ।
शूराणां फेरवाणाञ्च भूतानाञ्चाभवद्रणः ॥")
राक्षसः । इति मेदिनी । वे, ४४ ॥ धूर्त्ते हिंस्रे च, त्रि । इति शब्दरत्नावली ॥

फेरुः, पुं, (फे इति शब्देन रौतीति । रु ल ध्वनौ + मितद्र्वादित्वात् डुः । ) शृगालः । इत्यमरः । २ । ५ । ५ ॥ ( यथा, भागवते ।८।१६।७।
"गृहेषु येष्वतिथयो नार्च्चिताः सलिलैरपि ।
यदि निर्यान्ति ते नूनं फेरुराजगृहोपमाः ॥")

फेल, ऋ गतौ । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् । ) ऋ, अपिफेलत् पिफेलतुः । इति दुर्गादासः ॥

फेलं, क्ली, (फेल्यते दूरे निक्षिप्यते इति । फेल+घञ् । ) भुक्तसमुज्झितम् । उच्छिष्टम् । इति शब्दरत्नावली ॥

फेलकः, पुं, ( फेल+स्वार्थे संज्ञायां वा कन् । ) भुक्तसमुज्झितम् । इति जटाधरः ॥

फेला, स्त्री, ( फेल्यते इति । फेल+"गुरोश्च हलः ।" ३ । ३ । १०३ । इति अः । टाप् । ) भुक्तसमुज्झितम् । इत्यमरः । २ । ९ । ५६ ॥

फेलिः, स्त्री, ( फेल+इन् । ) उच्छिष्टम् । इति जटाधरः ॥

फेलिका, स्त्री, ( फेलिरेव । स्वार्थे कन् । ) उच्छिष्टम् । फेलाशब्दात् स्वार्थे ष्णिकप्रत्ययेन निष्पन्ना ॥

फेली, स्त्री, ( फेलि+"कृदिकारादक्तिनः ।" इति पक्षे ङीष् । ) भुक्तसमुज्झितम् । इति शब्दरत्नावली ॥

---

## ब

ब, बकारः । स च त्रयोविंशव्यञ्जनवर्णः । (पवर्गस्य तृतीयवर्णश्च ।) तस्योच्चारणस्थानं ओष्ठः । इति व्याकरणम् ॥ ( यदुक्तं सिद्धान्तकौमुद्याम् । "उपूपध्मानीयानामोष्ठौ ॥" ) तस्य स्वरूपं यथा, कामधेनुतन्त्रे ।
"बकारं शृणु चार्व्वङ्गि ! चतुर्वर्गप्रदायकम् ।
शरच्चन्द्रप्रतीकाशं पञ्चदेवमयं सदा ॥
पञ्चप्राणात्मकं वर्णं त्रिबिन्दुसहितं सदा ॥"
( वङ्गीयवर्णमालायामस्य स्वरूपमाह । )
"त्रिकोणरूपिणी रेखा विष्णुशक्तिस्वरूपिणी ।
मात्रा शक्तिः परा ज्ञेया ध्यानमस्य प्रचक्षते ॥"
अस्य ध्यानं यथा,—
"नीलवर्णां त्रिनयनां नीलाम्बरधरां पराम् ।
नागहारोज्ज्वलां देवीं द्विभुजां पद्मलोचनाम् ॥
एवं ध्यात्वा बकारन्तु तन्मन्त्रं दशधा जपेत् ॥"
तत्प्रणाममन्त्रो यथा,—
"त्रिशक्तिसहितं वर्णं त्रिबिधाम्बतवेपितम् ।
स्वयं कुण्डलिनीं देवीं सततं प्रणमाम्यहम् ॥"
इति वर्णोद्धारतन्त्रम् ॥ * ॥
अस्य नामानि यथा,—
"बो वनी भूधरो मार्गो घर्घरी लोचनप्रियः ।
प्रचेताः कलसः पक्षी स्थलगण्डः कपर्द्दिनी ॥
पृष्ठवंशो भयामातुः शिखिवाहो युगन्धरः ।
मुखबिन्दुर्व्वली घण्टा योद्धा त्रिलोचनप्रियः ॥
क्लेदिनी तापिनी भूमिसुगन्धिन्द्रवलिप्रियः ।
सुरभिर्म्मुखविष्णुश्च संहारी वसुधाधिपः ॥
षष्ठापुरं चपेटा च मोदको गगनं प्रति ।
पूर्व्वाषाढ़ामध्यलिङ्गौ शनिः कुम्भलतीयकौ ॥"
इति नानातन्त्रशास्त्रम् ॥

बंहिष्ठः, त्रि, (अयमेषामतिशयेन बहुलः । बहुल+"अतिशायने तमबिष्ठनौ ।" ५ । ३ । ५५ । इति इष्ठन् । "प्रियस्थिरेति ।" ६ । ४ । १५७ । इति बंहि-आदेशः ।) अतिशयबहुलः । इत्यमरः ॥ (यथा, महाभारते । १२ । ३२८ । ३९ ।
"योऽद्भिः संयोज्य जीमूतान् पर्ज्जन्याय प्रयच्छति ।
उद्वहो नाम बंहिष्ठस्तृतीयः स सदागतिः ॥")

बंहीयान्, [स्] त्रि, (अयमनयोरतिशयेन बहुलः । बहुल+"द्विवचनविभज्योपपदे तरबीयसुनौ ।" ५ । ३ । ५७ । इति ईयसुन् । "प्रियस्थिरस्फिरोरुबहुलेति ।" ६ । ४ । १५७ । इति बंहि-आदेशश्च । ) अतिशयबहुलः । अयमनयोरतिशयेन बहुः इत्यर्थे बहुशब्दादीयसुप्रत्ययेन निष्पन्नः । इति मुग्धबोधमतम् ॥

बः, पुं, वरुणः । कुम्भः । इति शब्दरत्नावली ॥
"बः पुमान् वरुणे सिन्धौ भगे तोये गतेऽपि च ।
गन्धने तन्तुसन्ताने पुंस्येव वपने स्मृतः ॥"
इति मेदिनी । वे, १ ॥ * ॥
तस्य साङ्केतिकनामानि यथा । युगन्धरः १ सुरभिः २ मुखविष्णुः ३ संहारः ४ वसुधाधिपः ५ । इति बीजवर्णाभिधानम् । भूधरः ६ दशगण्डः ७ । इति रुद्रयामलोक्तबीजाभिधानम् ॥
अपि च ।
"बो वनी भूधरो मार्गो घर्घरी लोचनप्रियः ।
प्रचेताः कलसः पक्षी स्थलगण्डः कपर्द्दिनी ॥
पृष्ठवंशो भयामातुः शिखिवाहो युगन्धरः ।
मुखबिन्दुर्बली घण्टा योद्धा त्रिलोचनप्रियः ।
क्लेदिनी तापिनी भूमिसुगन्धिन्द्रवलिप्रियः ।
सुरभिर्मुखविष्णुश्च संहारी वसुधाधिपः ॥
षष्ठापुरं चपेठा च मोदको गगनं प्रति ।
पूर्व्वाषाढ़ामध्यलिङ्गौ शनिः कुम्भलतीयकौ ॥"
इति तन्त्रान्तरम् ॥

ब(व)क, इ ङ कौटिल्ये । गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सक० च-सेट् ।) कौटिल्यमिह कुटिलीभावः कुटिलीकरणञ्च । इ, बङ्कते । ङ, वङ्कते काष्ठं कुटिलं स्यादित्यर्थः । वङ्कते काष्ठं कुटिलं करोतीत्यर्थः । इति दुर्गादासः ॥

ब(व)कः, पुं, (ब(व)ङ्कते कुटिलीभवतीति । वकि+अच् । पृषोदरादित्वात् नलोपः । ) स्वनामख्यातपक्षिविशेषः । तत्पर्य्यायः । कङ्कः २ । इत्यमरः । २ । ५ । २२ ॥ द्वारबलिभुक् ३ कह्वः ४ शुक्लवायसः ५ दीर्घजङ्घः ६ बकोटः ७ गृहबलिप्रियः ८ । इति शब्दरत्नावली ॥ निशैतः ९ शिखी १० चन्द्रविहङ्गमः ११ । इति त्रिकाण्डशेषः ॥ तीर्थसेवी १२ तापसः १३ मीनघाती १४ ध्यानाध्यायी १५ निश्चलाङ्गः १६ दाम्भिकः १७ । इति राजनिर्घण्टः ॥ अस्य मांसस्य गुणाः ।
"शरारिबककाकाश्च दात्यूहाः पवनापहाः ॥"
इति रत्नावली ॥
अपि च ।
"हंससारसकाचाक्षबकक्रौञ्चशरारिकाः ।
नन्दीमुखीसफादम्बावलाकाद्याः प्लवाः स्मृताः ॥
प्लवन्ते सलिले यस्मात् एते तस्मात् प्लवाः स्मृताः ॥
कुलेचराः प्लवाश्चापि कोशस्थाः पादिनस्तथा ।
मत्स्या एते समाख्याताः पञ्चधानूपजातयः ॥
आनूपा मधुराः स्निग्धा गुरवो वह्निसादनाः ।
श्लेष्मलाः पिच्छलाश्चापि मांसपुष्टिप्रदा भृशम् ॥
तथाभिष्यन्दिनस्ते हि प्रायोऽपथ्यतमाः स्मृताः ॥"
इति भावप्रकाशः ॥
स्वनामख्यातपुष्पवृक्षः । तत्पर्य्यायः । शिववल्ली २ पाशुपतः ३ एकाष्ठीलः ४ वसुः ५ । इत्यमरः ॥ एकाष्ठीला ६ शुकः ७ वसुकः ८ वस्तकः ९ । इति तट्टीका ॥ बकपुष्पः १० शिवमल्ली ११ । इति शब्दरत्नावली ॥ काकशीर्षः १२ स्थूलपुष्पः १३ शिवप्रियः १४ काकनामा १५ वसहट्टः १६ स्वपूरकः १७ रक्तपुष्पः १८ मुनितरुः १९ अगस्तिः २० वङ्गसेनकः २१ । इति रत्नमाला ॥ अगस्त्यः २२ शीघ्रपुष्पः २३ मुनिद्रुमः २४ व्रणारिः २५ दीर्घफलकः २६ वक्रपुष्पः २७ सुरप्रियः २८ ।
"सितपीतनीललोहितकुसुमभेदाच्चतुर्विधोऽगस्तिः ।
मधुरशिशिरदोषश्रमकासविनाशनश्च भूतघ्नः ॥"
तथा च ।
"अगस्ति शिशिरं गौल्यं त्रिदोषघ्नं श्रमापहम् ।
बलासकासवैवर्ण्यभूतघ्नञ्च बलावहम् ॥"
इति राजनिर्घण्टः ॥
अपि च ।
"अगस्तिकुसुमं शीतं चातुर्थकनिवारकम् ।
नक्तान्ध्यनाशनं तिक्तं कषायं कटुपाकि च ।
पीनसश्लेष्मपित्तघ्नं वातघ्नं मुनिभिर्मतम् ॥"
इति भावप्रकाशः ॥
अन्यच्च ।
"वासकस्य च पुष्पाणि वङ्गसेनस्य चैव हि ।
कटुपाकानि तिक्तानि कासक्षयकराणि च ॥"
इति राजवल्लभः ॥
"बकः पाशुपतश्चैव शिवापीड़श्च सुव्रतः ।
वसुकश्च शिवाह्वश्च शिवेष्टः क्रमपूरकः ॥
शिवमल्लिः शिवाङ्गाह्वः शाम्भवो रविसंज्ञितः ।